संस्कृत वार्ता:

25.08.2024

प्रातः - 06:55

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी अद्य पूर्वाह्ने एकादशवादने स्वीये "मन की बात" इति कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं त्रयोदशाधिकैकशतं संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं रात्रौ अष्टवादने भविता।

## प्रधानमन्त्री-महाराष्ट्रराजस्थानयो: यात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य महाराष्ट्रस्य जलगांवनगरे राजस्थानस्य च जोधपुरं प्रति यास्यति। प्रात: श्रीमोदी लखपति-दीदी सम्मेलने सहभागितां करिष्यति। असौ अत्रावसरे एकादशलक्षाधिकं लखपतिदीदी इत्येताभ्य: प्रमाणपत्राणि वितरिष्यति। एता: साम्प्रतिके एव समये एनडीएप्रशासनस्य तृतीये कार्यकाले लखपतित्वेन समभाजिता:। सायं श्रीमोदी राजस्थानस्य जोधपुरं सम्प्राप्स्यति। तत्रासौ राजस्थानोच्चन्यायालयस्य पञ्चसप्ततितमस्य समारोहस्य समापनसत्रे मुख्यातिथित्वेन भविष्यति। तत्र राजस्थानोच्चन्यायालयस्य सङ्ग्रहालयस्य उद्घाटनं विधास्यति।

## निवृत्तिवेतन योजना

केन्द्रीयमन्त्रिमण्डलेन सर्वकारीयकर्मचारिणां कृते एकीकृतसेवा निवृति वृति योजनायाः अनुमोदनं कृतम् अस्ति, यस्मिन् आश्वासित-निवृत्तिवित्ते: व्यवस्था अस्ति। ह्यः नवदिल्ल्यां मन्त्रिमण्डलस्य उपवेशनानन्तरं वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् योजनायाः प्रथमस्तम्भेन पञ्चविंशतिः वर्षाणां न्यूनतमअर्हकसेवायाः कृते सेवानिवृत्तेः पूर्वं द्वादशमासेषु प्राप्त सामान्यमूल वृत्ते : पञ्चाशत् प्रतिशतं निवृत्तिवृति: सुनिश्चिता भवति । द्वितीयस्तम्भः सुनिश्चितं करोति यत् कर्मचारिणः मृत्योः अनन्तरं परिवारस्य कृते षष्टि प्रतिशतं निवृत्तिराशिम् सुनिश्चितं करोति। वैष्णवमहोदयः अवदत् यत् अनया योजनया प्रायः त्रयोविंशतिः लक्षं यावत् केन्द्रसर्वकारस्य कर्मचारिणः लाभन्विताः भविष्यन्ति।

वैष्णवमहोदयेन उक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः अध्यक्षतायां मन्त्रिमण्डलेन उच्चप्रदर्शनयुक्तं जैवनिर्माणं पोषयितुं अर्थव्यवस्था-पर्यावरण-वृत्यावसराणां च कृते बायो ई३-बायोटेक्नोलॉजी इत्यस्याः नीतेः अपि स्वीकृतिः प्रदत्ता। श्री वैष्णवः अवदत् यत् एषा नीतिः विषयगतक्षेत्रेषु अनुसन्धान-उद्यमिता विकासानां कृते समर्थनं प्रदास्यति।

मन्त्रिमण्डलेन त्रयाणां छत्रयोजनानां निरन्तरतायै अपि अनुमोदनं कृतम्, येषां विलीनीकरणं विज्ञानधारा इति एकीकृतकेन्द्रीयक्षेत्रयोजनायाम् अभवत्, यत्र ऊनासीत्यधिक-पञ्चशतोत्तर-दशसहस्र कोटिरूप्यकाणां व्ययः भविष्यति।

## ब्राजीलविदेशमंत्री-भारतयात्रा

ब्राजीलदेशस्य विदेशमन्त्री मौरो विएरा इत्येषः अद्य चतुर्दिवसीयभारतयात्रायाः कृते नवदिल्ल्यां आगमिष्यति। विदेशमन्त्री एस जयशंकरः विएरा वर्यः च मंगलवासरे भारत-ब्राजील-संयुक्तायोगसभायाः नवमसंस्करणस्य सह-अध्यक्षतां करिष्यतः। विदेशमन्त्रालयेन उक्तं यत्, अवधेयं वर्तते यत् अस्मिन् वर्षे ब्राजील्-देशः जी-विंशतेः अध्यक्षपदं धारयति। उभौ मन्त्रिनौ चर्चां करिष्यतः यत् ट्रोइका इति रूपेण गतवर्षे भारतस्य अध्यक्षतायां प्राप्तान् जी-विंशतिः-सङ्घस्य प्रमुखपरिणामान् कथं अग्रे सारयितुं शक्यते इति।

## संस्कृत-साप्ताहिकी

संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः अद्य मध्याह्ने सार्धैक-वादनतःभविष्यति। कृपया श्रृण्वन्तु।

।।इति वार्ताः।।